# READING - 14

ससीतालक्ष्मणे श्रीरामचन्द्रे दण्डकारण्यं गच्छति कैकेयीपुत्रो भरतो राजगृहे मातुलभवने कंचित्कालमुषित्वा सर्वं वृत्तमविज्ञाय पुनरयोध्यां प्रत्याययौ । स रथस्थः सँल्लक्ष्मीहीनं नगरं पश्यन्दुःखितमना राजमन्दिरं राजहीनं सिंहहीनं कन्दरमिव प्रविवेश । आदितो वृत्तान्तं कैकेयीवदनादेव श्रुत्वा पितरं मृतं भ्रातरौ निर्वासितौ च ज्ञात्वा दशरथात्मजो ऽतीव शुशोच चुकोप च । भरत उवाच । धिक् त्वां पापे । किं कृतवती त्वम् । कुतः पुरुषव्याघ्रौ वनं जग्मतुः । ब्रूहि ब्रूहि किमक्रियत त्वया । एवमुक्ता स्वपुत्रेण सा रघुकुलाशनिरुत्तरं ददौ । हे पुत्रक त्वत्कृत एव मया सर्वमेतत्कृतम् । मा शोकमाश्रय वीर । अद्यप्रभृति राज्यं त्वया कर्तव्य-मिति । स शोकपीडितमनास्तस्या विपरीतवचनं शुश्राव सकोपश्च बभाषे । किं मया कार्यं राज्येन । ज्येष्ठपुत्रो रामो यथाविध्यभिषिच्यताम् । अहमद्य वनं गन्तास्मि रामचन्द्रवदनं द्रष्टुम् । मया सह पुनरागमिष्यत्ययोध्यां रघुकुलनन्दनः । त्वं तावद्वनं गच्छ । अग्निं प्रविश्य रज्जुं कण्ठे बद्ध्वा वा नरकं प्राप्नुहि । तवान्या गतिर्नास्तीति । यदि रामं वनादानेतुं न शक्नोमि तर्हि लक्ष्मणवत्तत्रैव स्थास्यामीति चिन्तयामास । अन्ततः स रामानुजो दशरथस्य चतुर्थपुत्रेण शत्रुघ्नेन सह महत्या सेनया परिवृतो दण्डकारण्यगमनमारेभे ॥